# श्रीनिवास विद्य

## शुक्ल पक्ष

हिरंण्यवर्णां हरिंणीं सुवर्णरजतस्रजाम् ।
चन्द्रां हिरण्मयीं लक्ष्मीं जातंवेदो म आवंह ॥ श्री.1 ॥

सहस्रंशीर्षा पुरुंषः । सहस्राक्षः सहस्रंपात् ।
स भूमिं विश्वतों वृत्वा । अत्यंतिष्ठद्दशाङ्गुलम् ॥ पु.1 ॥

तां म आवंह जातंवेदो लक्ष्मीमनंपगामिनींम् ।
यस्यां हिरंण्यं विन्देयं गामश्वं पुरुंषानहम् ॥ श्री.2 ॥

पुरुंष एवेदꣳ सर्वम्ं । यद्भूतं यच्च भव्यम्ं।
उतामृंतत्वस्येशांनः । यदन्नेंनातिरोहंति ॥ पु.2 ॥

अश्वपूर्वां रंथमध्यां हस्तिनांदप्रबोधिंनीम् ।
श्रियं देवीमुपंह्वये श्रीर्मां देवीर्जुंषताम् ॥ श्री.3 ॥

एतावांनस्य महिमा । अतो ज्यायाꣳश्च पूरुंषः ।
पादोंऽस्य विश्वां भूतानिं । त्रिपादंस्यामृतं दिवि ॥ पु.3 ॥

त्रिपादूर्ध्व उदैत्पुरुंषः । पादोंऽस्येहाऽऽभंवात्पुनः ।
ततो विश्वङ्व्यंक्रामत् । साशनानशने अभि ॥ पु.4 ॥

कां सोंस्मितां हिंरण्यप्राकारामाद्रां ज्वलंन्तीं तृप्तां तर्पयन्तीम् ।
पद्मे स्थितां पद्मवंर्णां तामिहोपंह्वये श्रियम् ॥ श्री.4 ॥

चन्द्रां प्रंभासां यशंसा ज्वलंन्तीं श्रियं लोके देवजुष्टामुदाराम् ।
तां पद्मिनींमीं शरंणमहं प्रपद्येऽलक्ष्मीर्मे नश्यतां त्वां वृंणे ॥ श्री.5 ॥

तस्मांद्विराडंजायत । विराजो अधि पूरुंषः ।
स जातो अत्यंरिच्यत । पश्चाद्भूमिमथों पुरः ॥ पु.5 ॥

आदित्यवंर्णे तपसोऽधिंजातो वनस्पतिस्तव वृंक्षोऽथ बिल्वः ।
तस्य फंलानि तपसा नुंदन्तु मायान्तंरायाश्च बाह्या अलक्ष्मीः ॥ श्री.6 ॥

यत्पुरुंषेण हविषां । देवा यज्ञमतंन्वत ।
वसन्तो अंस्यासीदाज्यम्ं । ग्रीष्म इध्मः शरद्धविः ॥ पु.6 ॥

उपैतु मां देवसखः कीर्तिश्च मणिना सह ।
प्रादुर्भूतोऽस्मि राष्ट्रेऽस्मिन् कीर्तिमृद्धिं ददातु मे ॥ श्री.7 ॥

सप्तास्यासन्परिधयः । त्रिः सप्त समिधः कृताः ।
देवा यद्यज्ञं तन्वानाः । अबध्नन्पुरुषं पशुम् ॥ पु.7 ॥

क्षुत्पिपासामलां ज्येष्ठामलक्ष्मीं नाशयाम्यहम् ।
अभूतिमसमृद्धिं च सर्वां निर्णुद मे गृहात् ॥ श्री.8 ॥

तम् यज्ञं बर्हिषि प्रौक्षन् । पुरुषं जातमग्रतः ।
तेन देवा अयजन्त । साध्या ऋषयश्च ये ॥ पु.8 ॥

गंधद्वारां दुराधर्षां नित्यपुष्टां करीषिणीम् ।
ईश्वरीं सर्वभूतानां तामिहोपह्वये श्रियम् ॥ श्री.9 ॥

तस्माद्यज्ञात्सर्वहुतः । संभृतं पृषदाज्यम् ।
पशूस्ताश्चक्रे वायव्यान् । आरण्यान्ग्राम्याश्च ये ॥ पु.9 ॥

मनसः काममाकूतिं वाचः सत्यमशीमहि ।
पशूनां रूपमन्नस्य मयि श्रीः श्रयतां यशः ॥ श्री.10 ॥

तस्माद्यज्ञात्सर्वहुतः । ऋचः सामानि जज्ञिरे ।
छन्दांसि जज्ञिरे तस्मात् । यजुस्तस्मादजायत ॥ पु.10 ॥

कर्दमेन प्रजाभूता मयि सम्भव कर्दम ।
श्रियं वासय मे कुले मातरं पद्ममालिनीम् ॥ श्री.11 ॥

तस्मादश्वा अजायन्त । ये के चोभयादतः ।
गावो ह जज्ञिरे तस्मात् । तस्माज्जाता अजावयः ॥ पु.11 ॥

आपः सृजन्तु स्निग्धानि चिक्लीत वस मे गृहे ।
नि च देवीं मातरं श्रियं वासय मे कुले ॥ श्री.12 ॥

यत्पुरुषं व्यदधुः । कतिधा व्यकल्पयन् ।
मुखं किमस्य कौ बाहू । कावूरू पादावुच्येते ॥ पु.12 ॥

आर्द्रां यःकरिणीं यष्टिं पिङ्गलां पद्ममालिनीम् ।
चन्द्रां हिरण्मयीं लक्ष्मीं जातवेदो म आवह ॥ श्री.13 ॥

ब्रा॒ह्म॒णो᳚ऽस्य॒ मुख॑मासीत् । बा॒हू रा॑ज॒न्यः॑ कृ॒तः ।
ऊ॒रू तद॑स्य॒ यद्वैश्यः॑ । प॒द्भ्याग्ं॑ शू॒द्रो अ॑जायत ॥ पु.13 ॥

आ॒र्द्रां पु॒ष्करि॑णीं पु॒ष्टिं सु॒व॒र्णां हे॑ममा॒लिनीम् ।
सू॒र्यां हि॒रण्म॑यीं ल॒क्ष्मीं जात॑वेदो म॒ आव॑ह ॥ श्री.14 ॥

च॒न्द्रमा॒ मन॑सो जा॒तः । चक्षोः॒ सूर्यो॑ अजायत ।
मुखा॒दिन्द्र॑श्चा॒ग्निश्च॑ । प्रा॒णाद्वा॒युर॑जायत ॥ पु.14 ॥

तां म॒ आव॑ह॒ जा॑तवेदो ल॒क्ष्मीम॑नपगा॒मिनी᳚म् ।
यस्यां॒ हिर॑ण्यं प्रभू॑तं॒ गावो॑ दा॒स्योऽश्वा᳚न्वि॒न्देयं॒ पुरु॑षान॒हम् ॥ श्री.15 ॥

नाभ्यां आसीद॒न्तरि॑क्षम् । शी॒र्ष्णो द्यौः सम॑वर्तत ।
प॒द्भ्यां भूमि॒र्दिशः॒ श्रोत्रा᳚त् । तथा॑ लो॒काग्ं अ॑कल्पयन् ॥ पु.15 ॥

## कृष्ण पक्ष

सहस्रंशीर्षा पुरुंषः । सहस्राक्षः सहस्रंपात् ।
स भूमिं विश्वतों वृत्वा । अत्यंतिष्ठद्दशाङ्गुलम् ॥ पु.1 ॥

हिरंण्यवर्णां हरिंणीं सुवर्णरजतस्रजाम् ।
चन्द्रां हिरण्मयीं लक्ष्मीं जातंवेदो म आवंह ॥ श्री.1 ॥

पुरुंष एवेदग्ं सर्वम्ँ । यद्भूतं यच्च भव्यम्ँ।
उतामृंतत्वस्येशांनः । यदन्नेंनातिरोहंति ॥ पु.2 ॥

तां म आवंह जातंवेदो लक्ष्मीमनंपगामिनीम्ँ ।
यस्यां हिरंण्यं विन्देयं गामश्वं पुरुंषानहम् ॥ श्री.2 ॥

एतावांनस्य महिमा । अतो ज्यायाग्ंश्च पूरुंषः ।
पादोंऽस्य विश्वां भूतानिं । त्रिपादंस्यामृतं दिवि ॥ पु.3 ॥

अश्वपूर्वां रंथमध्यां हस्तिनांदप्रबोधिंनीम् ।
श्रियँ देवीमुपंह्वये श्रीर्मा देवीर्जुंषताम् ॥ श्री.3 ॥

त्रिपादूर्ध्व उदैत्पुरुंषः । पादोंऽस्येहाऽऽभंवात्पुनः ।
ततो विश्वङ्व्यंक्रामत् । साशनानशने अभि ॥ पु.4 ॥

कां सोंस्मितां हिंरण्यप्राकारामार्द्रां ज्वलंन्तीं तृप्तां तर्पयन्तीम् ।
पद्मे स्थितां पद्मवंर्णां तामिहोपंह्वये श्रियम् ॥ श्री.4 ॥

तस्माँद्विराडंजायत । विराजो अधि पूरुंषः ।
स जातो अत्यंरिच्यत । पश्चाद्भूमिमथों पुरः ॥ पु.5 ॥

चन्द्रां प्रंभासां यशसा ज्वलंन्तीं श्रियं लोके देवजुष्टामुदाराम् ।
तां पद्मिनीमीं शरंणमहं प्रपद्येऽलक्ष्मीर्में नश्यतां त्वां वृंणे ॥ श्री.5 ॥

यत्पुरुंषेण हविषाँ । देवा यज्ञमतंन्वत ।
वसन्तो अंस्यासीदाज्यम्ँ । ग्रीष्म इध्मः शरद्धविः ॥ पु.6 ॥

आदित्यवंर्णे तपसोऽधिंजातो वनस्पतिस्तव वृंक्षोऽथ बिल्वः ।
तस्य फंलानि तपसा नुंदन्तु मायान्तंरायाश्च बाह्या अलक्ष्मीः ॥ श्री.6 ॥

सप्तास्यांसन्परिधयः । त्रिः सप्त समिधः कृताः ।
देवा यद्यज्ञं तंन्वानाः । अबंध्नन्पुंरुषं पशुम् ॥ पु.7 ॥

उपैतु मां देवसखः कीर्तिश्च मणिना सह ।
प्रादुर्भूतोऽस्मि राष्ट्रेऽस्मिन् कीर्तिमृद्धिं ददातु मे ॥ श्री.7 ॥

तम् यज्ञं बर्हिषि प्रौक्षन् । पुरुषं जातमग्रतः ।
तेन देवा अयजन्त । साध्या ऋषयश्च ये ॥ पु.8 ॥

क्षुत्पिपासामलां ज्येष्ठामलक्ष्मीं नाशयाम्यहम् ।
अभूतिमसमृद्धिं च सर्वां निर्णुद मे गृहात् ॥ श्री.8 ॥

तस्माद्यज्ञात्सर्वहुतः । संभृतं पृषदाज्यम् ।
पशूस्ताश्चक्रे वायव्यान् । आरण्यान्ग्राम्याश्च ये ॥ पु.9 ॥

गंधद्वारां दुराधर्षां नित्यपुष्टां करीषिणीम् ।
ईश्वरीं सर्वभूतानां तामिहोपह्वये श्रियम् ॥ श्री.9 ॥

तस्माद्यज्ञात्सर्वहुतः । ऋचः सामानि जज्ञिरे ।
छन्दांसि जज्ञिरे तस्मात् । यजुस्तस्मादजायत ॥ पु.10 ॥

मनसः काममाकूतिं वाचः सत्यमशीमहि ।
पशूनां रूपमन्नस्य मयि श्रीः श्रयतां यशः ॥ श्री.10 ॥

तस्मादश्वा अजायन्त । ये के चोभयादतः ।
गावो ह जज्ञिरे तस्मात् । तस्माज्जाता अजावयः ॥ पु.11 ॥

कर्दमेन प्रजाभूता मयि सम्भव कर्दम ।
श्रियं वासय मे कुले मातरं पद्ममालिनीम् ॥ श्री.11 ॥

यत्पुरुषं व्यदधुः । कतिधा व्यकल्पयन् ।
मुखं किमस्य कौ बाहू । कावूरू पादावुच्येते ॥ पु.12 ॥

आपः सृजन्तु स्निग्धानि चिक्लीत वस मे गृहे ।
नि च देवीं मातरं श्रियं वासय मे कुले ॥ श्री.12 ॥

ब्राह्मणोऽस्य मुखमासीत् । बाहू राजन्यः कृतः ।
ऊरू तदस्य यद्वैश्यः । पद्भ्यां शूद्रो अजायत ॥ पु.13 ॥

आर्द्रां यःकरिणीं यष्टिं पिङ्गलां पद्ममालिनीम् ।
चन्द्रां हिरण्मयीं लक्ष्मीं जातवेदो म आवह ॥ श्री.13 ॥

च॒न्द्रमा॒ मन॑सो जा॒तः । चक्षो॒ः सूर्यो॑ अजायत ।
मुखा॒दिन्द्र॑श्चा॒ग्निश्च॑ । प्रा॒णाद्वा॒युर॑जायत ॥ पु.14 ॥

आ॒र्द्रां पु॒ष्करि॑णीं पु॒ष्टिं सु॒व॒र्णां हे॑ममा॒लिनीम् ।
सू॒र्यां हि॒रण्म॑यीं ल॒क्ष्मीं जात॑वेदो म॒ आव॑ह ॥ श्री.14 ॥

नाभ्या॑ आसीद॒न्तरि॑क्षम् । शी॒र्ष्णो द्यौः सम॑वर्तत ।
प॒द्भ्यां भूमि॒र्दिश॒ः श्रोत्रा᳚त् । तथा॑ लो॒काꣳ अ॑कल्पयन् ॥ पु.15 ॥

तां म॒ आव॑ह॒ जा॑तवेदो ल॒क्ष्मीमन॑पगा॒मिनी᳚म् ।
यस्यां॒ हिर॑ण्यं प्रभू॒तं॒ गावो॑ दा॒स्योऽश्वा॒न्विन्दे॑यं॒ पुरु॑षान॒हम् ॥ श्री.15 ॥

# अथ श्रीनारायणकवचम् ।

राजोवाच ।
यया गुप्तः सहस्राक्षः सवाहान् रिपुसैनिकान् ।
क्रीडन्निव विनिर्जित्य त्रिलोक्या बुभुजे श्रियम् ॥ 1 ॥

भगवंस्तन्ममाख्याहि वर्म नारायणात्मकम् ।
यथाऽऽततायिनः शत्रून् येन गुप्तोऽजयन्मृधे ॥ 2 ॥

श्रीशुक उवाच ।
वृतः पुरोहितस्त्वाष्ट्रो महेन्द्रायानुपृच्छते ।
नारायणाख्यं वर्माह तदिहैकमनाः शृणु ॥ 3 ॥

श्री विश्वरूप उवाच ।
धौताङ्घ्रिपाणिराचम्य सपवित्र उदङ्मुखः ।
कृतस्वाङ्गकरन्यासो मन्त्राभ्यां वाग्यतः शुचिः ॥ 4 ॥

नारायणमयं वर्म सन्नह्येद्भय आगते ।
पादयोर्जानुनोरूर्वोरुदरे हृद्यथोरसि ॥ 5 ॥

मुखे शिरस्यानुपूर्व्यादोंकारादीनि विन्यसेत् ।
ॐ नमो नारायणायेति विपर्ययमथापि वा ॥ 6 ॥

करन्यासं ततः कुर्याद्द्वादशाक्षरविद्यया ।
प्रणवादियकारान्तः अङ्गुल्यङ्गुष्ठपर्वसु ॥ 7 ॥

न्यसेद्धृदय ओङ्कारं विकारमनु मूर्धनि ।
षकारं तु भ्रुवोर्मध्ये णकारं शिखया दिशेत् ॥ 8 ॥

वेकारं नेत्रयोर्युञ्ज्यात् नकारं सर्वसन्धिषु ।
मकारमस्त्रमुद्दिश्य मन्त्रमूर्तिर्भवेद्बुधः ॥ 9 ॥

सविसर्गं फडन्तं तत् सर्वदिक्षु विनिर्दिशेत् ।
ॐ विष्णवे नम इति ॥ 10 ॥

आत्मानं परमं ध्यायेत् ध्येयं षट्शक्तिभिर्युतम् ।
विद्यातेजस्तपोमूर्तिं इमं मन्त्रमुदाहरेत् ॥ 11 ॥

ॐ हरिर्विदध्यान्मम सर्वरक्षां न्यस्ताङ्घ्रिपद्मः पतगेन्द्रपृष्ठे ।
दरारिचर्मासिगदेषुचाप पाशान् दधानोऽष्टगुणोऽष्टबाहुः ॥ 12 ॥

जलेषु मां रक्षतु मत्स्यमूर्तिः यादोगणेभ्यो वरुणस्य पाशात् ।
स्थलेषु मायावटुवामनोऽव्यात् त्रिविक्रमः खेऽवतु विश्वरूपः ॥ 13 ॥

दुर्गेष्वटव्याजिमुखादिषु प्रभुः पायान्नृसिंहोऽसुरयूथपारिः ।
विमुञ्चतो यस्य महाट्टहासं दिशो विनेदुर्न्यपतंश्च गर्भाः ॥ 14 ॥

रक्षत्वसौ माध्वनि यज्ञकल्पः स्वदंष्ट्रयोन्नीतधरो वराहः ।
रामोऽद्रिकूटेष्वथ विप्रवासे सलक्ष्मणोऽव्याद् भरताग्रजोऽस्मान् ॥ 15 ॥

मामुग्रधर्मादखिलात्प्रमादात् नारायणः पातु नरश्च हासात् ।
दत्तस्त्वयोगादथ योगनाथः पायाद्गुणेशः कपिलः कर्मबन्धात् ॥ 16 ॥

सनत्कुमारोऽवतु कामदेवात् हयशीर्षा मां पथि देवहेलनात् ।
देवर्षिवर्यः पुरुषार्चनान्तरात् कूर्मो हरिर्मां निरयादशेषात् ॥ 17 ॥

धन्वन्तरिर्भगवान् पात्वपथ्यात् द्वन्द्वाद्भयादृषभो निर्जितात्मा ।
यज्ञश्च लोकादवताज्जनान्तात् बलो गणात् क्रोधवशादहीन्द्रः ॥ 18 ॥

द्वैपायनो भगवानप्रबोधात् बुद्धस्तु पाखण्डगणात् प्रमादात् ।
कल्किः कलेः कालमलात्प्रपातु धर्मावनायोरुकृतावतारः ॥ 19 ॥

मां केशवो गदया प्रातरव्यात् गोविन्द आसङ्गवमात्तवेणुः ।
नारायणः प्राह्ण उदात्तशक्तिः मध्यन्दिने विष्णुररीन्द्रपाणिः ॥ 20 ॥

देवोऽपराह्णे मधुहोग्रधन्वा सायं त्रिधामावतु माधवो माम् ।
दोषे हृषीकेश उतार्धरात्रे निशीथ एकोऽवतु पद्मनाभः ॥ 21 ॥

श्रीवत्सधामापररात्र ईशः प्रत्यूष ईशोऽसिधरो जनार्दनः ।
दामोदरोऽव्यादनुसन्ध्यं प्रभाते विश्वेश्वरो भगवान् कालमूर्तिः ॥ 22 ॥

चक्रं युगान्तानलतिग्मनेमि भ्रमत्समन्तात् भगवत्प्रयुक्तम् ।
दन्दग्धि दन्दग्ध्यरिसैन्यमाशु कक्षं यथा वातसखो हुताशः ॥ 23 ॥

गदेऽशनिस्पर्शनविस्फुलिङ्गे निष्पिण्ढि निष्पिण्ढ्यजितप्रियासि ।
कूष्माण्डवैनायकयक्षरक्षो भूतग्रहांश्चूर्णय चूर्णयारीन् ॥ 24 ॥

त्वं यातुधानप्रमथप्रेतमातृ पिशाचविप्रग्रहघोरदृष्टीन् ।
दरेन्द्र विद्रावय कृष्णपूरितो भीमस्वनोऽरेर्हृदयानि कम्पयन् ॥ 25 ॥

त्वं तिग्मधारासिवरारिसैन्य मीशप्रयुक्तो मम छिन्धि छिन्धि ।
चक्षूंषि चर्मन् चतचन्द्रच्छादय द्विषामघोनां हर पापचक्षुषाम् ॥ 26 ॥

यन्नो भयं ग्रहेभ्योऽभूत् केतुभ्यो नृभ्य एव च ।
सरीसृपेभ्यो दंष्ट्रिभ्यो भूतेभ्योंऽहोभ्य एव व ॥ 27 ॥

सर्वाण्येतानि भगवन्नामरूपास्त्रकीर्तनात् ।
प्रयान्तु संक्षयं सद्यो ये नः श्रेयःप्रतीपकाः ॥ 28 ॥

गरुडो भगवान् स्तोत्रस्तोभश्छन्दोमयः प्रभुः ।
रक्षत्वशेषकृच्छ्रेभ्यो विष्वक्सेनः स्वनामभिः ॥ 29 ॥

सर्वापद्भ्यो हरेर्नामरूपयानायुधानि नः ।
बुद्धीन्द्रियमनःप्राणान् पान्तु पार्षदभूषणाः ॥ 30 ॥

यथा हि भगवानेव वस्तुतः सदसच्च यत् ।
सत्येनानेन नः सर्वे यान्तु नाशमुपद्रवाः ॥ 31 ॥

यथैकात्म्यानुभावानां विकल्परहितः स्वयम् ।
भूषणायुधलिङ्गाख्या धत्ते शक्तीः स्वमायया ॥ 32 ॥

तेनैव सत्यमानेन सर्वज्ञो भगवान् हरिः ।
पातु सर्वैः स्वरूपैर्नः सदा सर्वत्र सर्वगः ॥ 33 ॥

विदिक्षु दिक्षूर्ध्वमधः समन्ता दन्तर्बहिर्भगवान् नारसिंहः ।
प्रहापयँल्लोकभयं स्वनेन स्वतेजसा ग्रस्तसमस्ततेजाः ॥ 34 ॥

मघवन्निदमाख्यातं वर्म नारायणात्मकम् ।
विजेष्यस्यञ्जसा येन दंशितोऽसुरयूथपान् ॥ 35 ॥

एतद्धारयमाणस्तु यं यं पश्यति चक्षुषा ।
पदा वा संस्पृशेत्सद्यः साध्वसात्स विमुच्यते ॥ 36 ॥

न कुतश्चिद्भयं तस्य विद्यां धारयतो भवेत् ।
राजदस्युग्रहादिभ्यो व्याघ्रादिभ्यश्च कर्हिचित् ॥ 37 ॥

इमां विद्यां पुरा कश्चित् कौशिको धारयन् द्विजः ।
योगधारणया स्वाङ्गं जहौ स मरुधन्वनि ॥ 38 ॥

तस्योपरि विमानेन गन्धर्वपतिरेकदा ।
ययौ चित्ररथः स्त्रीभिर्वृतो यत्र द्विजक्षयः ॥ 39 ॥

गगनान्न्यपतत्सद्यः सविमानो ह्यवाक्शिराः ।
स वालखिल्यवचनादस्थीन्यादाय विस्मितः ।
प्रास्य प्राचीसरस्वत्यां स्नात्वा धाम स्वमन्वगात् ॥ 40 ॥

श्रीशुक उवाच ।

य इदं शृणुयात् काले यो धारयति चादृतः ।
तं नमस्यन्ति भूतानि मुच्यते सर्वतो भयात् ॥ 41 ॥

एतां विद्यामधिगतो विश्वरूपाच्छतक्रतुः ।
त्रैलोक्यलक्ष्मीं बुभुजे विनिर्जित्य मृधेऽसुरान् ॥ 42 ॥

॥ इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां षष्ठस्कन्धे नारायणवर्मकथनं नाम आष्टमोऽध्यायः ॥